उपशास्त्री - प्रखण्ड साहित्य - तृतीय - प्रथम

इन्द्रवंशा-छन्दः श्रुतबोध

Saathi

Date __/__/____

प्र० (1) - SSISSIISISIS।

यस्यामशोकाङ्कुरपाणिपल्लवे ! वंशस्थ पादा गुरुपूर्ववर्णकाः ।

तारुण्यहेलारतिरङ्गलालसे ! तामिन्द्रवंशां कवयः प्रचक्षते ॥

उत्तरम् - शब्दार्थः - अशोकाङ्कुरपाणिपल्लवे = अशोकवृक्ष के अंकुरों जैसे कोमल कर - किसलयों वाली । तारुण्यहेलारतिरङ्गलालसे = यौवनमद से अनायास ही सुरताभिलाष वाली । यस्याः = जिसे । वंशस्थपादाः = वंशस्थ छन्द के चरण । गुरुपूर्ववर्णकाः = गुरु है पूर्ववर्ण जिनमें ऐसे हो । ताम् = उसे । कवयः = विद्वान लोग । इन्द्रवंशा प्रचक्षते = इन्द्रवंशा कहते हैं ।

व्याख्या - अशोकस्य = तदाख्यवृक्षविशेषस्य अङ्कुरवत् पाणिपल्लवौ यस्याः सा तत्सम्बुद्धौ अशोकाङ्कुरपाणिपल्लवे = अशोकप्ररोहवत् कोमल कर किसलये । ये तारुण्य हेलारतिरङ्गलालसे = यौवन क्रीड़या = यौवन - क्रीड़या सुरताभिलाषिणि । यस्या वंशस्थपादाः = वंशस्थ वृत्तस्य चरणाः गुरुपूर्ववर्णको येषां ते गुरुः पूर्ववर्णको येषां ते गुरुवर्णकाः = दीर्घप्रथमाक्षराः भवन्ति कवयः विद्वांसः ताम् इन्द्रवंशेति नामधेयां वदन्ति ।

भावार्थ - वंशस्थ छन्द के चारों चरणों में यदि प्रथमाक्षर गुरु हो तो उसे इन्द्रवंशा छन्द कहते हैं ।

Renu Devi
01/10/20
राधा उमाकान्त सं० महावि० सुरवसेना पूर्णिया

Page No. ____

उपशास्त्री - I खण्ड साहित्य - तृतीय - पत्रम्
किरातार्जुनीय महाकाव्यम्
प्रथमः सर्गः

प्र0(1) - तथापि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसम्पदा यशः ।
समुन्नयन् भूतिमनार्यसंगमाद्वरं विरोधोऽपि समं महात्मभिः ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि भारवि विरचितस्य किरातार्जुनीय महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति ।
अस्मिन् श्लोके युधिष्ठिरं प्रति वनेचरस्य उक्तिः -

व्याख्या - जिह्मः वक्रः भवज्जिगीषया गुणैर्भवन्तमाक्रमितुमिच्छये-त्यर्थः । तनोति विस्तारयति समुन्नयन् उत्कर्षमापादयन् अनार्यसंगमात् दुर्जनसंसर्गात् ।

भावार्थः - भवतः पराभवमाशंकमानोऽपि कुटिलः स दयादाक्षिण्यादिगुणसम्पदं वर्जयित्वा तथापि भवन्तं जेतु मोहमानः स्वकीयं यशो विस्तारयति । दुर्जनसंसर्गापेक्षया सज्जनैः सह विरोधोऽपि वरमेव यः नैश्वर्यमुत्कर्षं गच्छति ।

Renu Devi
01/10/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

Page No.

शास्त्री - खण्ड    साहित्य

अभिज्ञान शाकुन्तलम - सप्तमोऽङ्कः

Date ___/___/_____

प्र०(1) मनोरथाय नाशंसे किं बाहो स्पन्दसे वृथा ।
पूर्वावधीरितं श्रेयो दुःखं हि परिवर्तते ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोक महाकवि कालिदास प्रणीतस्य अभिज्ञानशाकुन्तलम् नाट्यशास्त्रस्य सप्तमोऽङ्कात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके कश्यपाश्रमे स्पन्दमानदक्षिणभुजो नृपतिः दुष्यन्तः तत्स्पन्दनस्य शाकुन्तलोपलब्धिसूचकत्वात् असम्भाव्यत्वात् सानुशयमाह -

व्याख्या - हे बाहो ! = अयि मम दक्षिणहस्त ! मुधा = व्यर्थं, किं स्पन्दसे = किं स्फुरसि यतः, मनोरथाय = शकुन्तलाप्राप्तिरुपाय स्वाभिलषिताय, न आशंसे = नहि आशां करोमि, शकुन्तलायाः प्राप्तये हृदि आशां न धारयामि, हि = यतः पूर्वावधीरितम् - पूर्वं = प्राक् अवधीरितं = पूर्वावधीरितम् श्रेयः = कल्याणं सुखसाधनं प्रियादुःखं = कृच्छ्रेण परिवर्तते = निवर्तते, पुनरायाति यद्वा दुःखरूपेण परिवर्तते = परिणमति, यद्वा श्रेयो यया स्वयमेव तिरस्कृतं, सम्प्रति दुःखमात्रमेवावशिष्यते ।
अतः क्व सुखम् ? अहं तु केवलं दुःखभागास्मि ।
अर्थात् हे दक्षिणहस्त ! वृथा ते स्फुरणम् प्रियाप्राप्तिविषये सर्वथाऽहं निराशः ।
अत्रार्थान्तरन्यासातिशयोक्त्यलंकारौ छन्दश्चानुष्टुप् ।

Renupuri
01/10/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

Page No.

शास्त्री - प्रथम साहित्य

रघुवंश - चतुर्दशःसर्गः

Date __/__/__

प्र०(1) - आनन्दजः शोकजमश्रुवाष्पस्तयोरशीतं शिशिरो बिभेद ।
गङ्गासरय्वोर्जलमुष्णतप्तं हिमाद्रिनिस्यन्द इवावतीर्णः ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य चतुर्दशसर्गात् उद्धृतोऽस्ति । अस्मिन् श्लोके श्रीरामः स्वरूपवर्णनं करोति ।

व्याख्या - तयो = मात्रोः कौशल्यासुमित्रयोः । आनन्दजः = हर्षोत्पन्नः अत एव शिशिरः = शीतलः । वाष्प = अश्रु । शोकजं = शोकोत्पन्नम । अत एव अशीतम् = उष्णम् । अश्रु बाष्पं उष्णतप्तं = ग्रीष्म तप्तं । गंगासरय्वोः = भागीरथीसरयुनद्योः । जलं = तोयम् । अवतीर्णः = प्रविष्टः । हिमाद्रिनिस्यन्द इव = हिमालयनिर्झर इव । बिभेद = विदधार ।

भावार्थः - यथा वर्षतौ हिमालयस्य शीतलः प्रवाहो ग्रीष्म-सन्तप्तं गङ्गासरयूजलं प्रविश्य शीतलयति, तथैव कौशल्यासुमित्रयोः श्रीरामलक्ष्मणमसहर्षोत्पन्नं शीतलमश्रुजलं पतिनिधनशोकोत्पन्नमुष्णाश्रुजलं शीतलं चकारेति भावः ।

Renu Devi
01/10/20
राधा उमाकान्त सं० महावि० सुरवसेना
पूर्णिया ।

Page No. ____